श्रीमते रामानुजाय नमः

## ।।प्रार्थनापंचकं।।

यतीश्वर श्रुणु श्रीमन् कृपया परया तव।
मम विज्ञापनमिदं विलोक्य वरदं गुरुं।।१
अनादि पापरचितां अंतःकरणनिष्ठितां।
यतींद्र विषये सांद्रां विनिर्वासय वासनां।।२
अपि प्रार्थयमानानां पुत्रक्षेत्रादिसंपदां।
कुरु वैराग्यमेवात्र हितकारिन् यतींद्र नः।।३
यथापराधा न स्युर्मे भक्तेषु भगवत्यपि।
तथा लक्ष्मणयोगींद्र यावद्देहं प्रवर्तय।।४
आमोक्षं लक्ष्मणार्य त्वत्प्रबंध परिशीलनैः।
कालक्षेपोऽस्तु नस्सद्भिस्सहवासमुपेयुषां।।५
परांकुशयतींद्रादि परमाचार्यसूक्तयः।
स्वदंतां मम जिह्वायै स्वयमेव यतीश्वर।।६
इत्येतत्सादरं विद्वान् प्रार्थनापंचकं पठन्।
प्राप्नुयात् परमां भक्तिं यतिराज पदाब्जयोः।।७
काषायशोभि कमनीयशिखानिवेशं
दण्डत्रयोज्ज्वलकरं विमलोपवीतं।
उद्यद्दिनेश निभमुल्लस दूर्ध्वपुण्ड्रं
रूपं तवास्तु यतिराज दृशोर्ममाग्रे।।
नचेद्रामानुजेत्येषा चतुरा चतुरक्षरी।
कामवस्थां प्रपद्यन्ते जन्तवो हंत मादृशः।।
पुण्याम्भोज विकासाय पापध्वान्त क्षयाय च।
श्रीमानाविरभूद् भूमौ रामानुज दिवाकरः।।
तृणीकृत विरिंचादि निरंकुश विभूतयः।
रामानुज पदाम्भोज समाश्रयणशालिनः।।

।।प्रार्थनापंचकं।।

मण्डयं नायक रामानुजः